योगवासिष्ठः/प्रकरणम् २ (मुमुक्षुव्यवहारप्रकरणम्)/सर्गः १९

एकोनविंशः सर्गः १९

श्रीवसिष्ठ उवाच ।

विशिष्टांशसमर्थत्वमुपमानेषु गृह्यते ।

को भेदः सर्वसादृश्ये तूपमानोपमेययोः ।। १

दृष्टान्तबुद्धावेकात्मज्ञानशास्त्रार्थवेदनात् ।

महावाक्यार्थसंसिद्धा शान्तिनिर्वाणमुच्यते ।। २

तस्माद्दृष्टान्तदार्ष्टान्तविकल्पोल्लसितैरलम् ।

यया कयाचिद्युक्त्या तु महावाक्यार्थमाश्रयेत् ।। ३

शान्तिः श्रेयः परं विद्धि तत्प्राप्तौ यत्नवान्भव ।

भोक्तव्यमोदनं प्राप्तं किं तत्सिद्धौ विकल्पितैः ।। ४

अकारणैः कारणिभिर्बोधार्थमुपमीयते ।

उपमानैस्तूपमेयैः सदृशैरेकदेशतः ।। ५

स्थातव्यं नेह भोगेषु विवेकरहितात्मना ।

उपलोदरसंजातपरिपीनान्धभेकवत् ।। ६

दृष्टान्तैर्यत्नमाश्रित्य जेतव्यं परमे पदम् ।

विचारणवता भाव्यं शान्तिशास्त्रार्थशालिना ।। ७

शास्त्रोपदेशसौजन्यप्रज्ञातज्ज्ञसमागमैः ।

अन्तरान्तरसंपन्नधर्मार्थोपार्जनक्रियः ।। ८

तावद्विचारयेत्प्राज्ञो यावद्विश्रान्तिमात्मनि ।

संप्रयात्यपुनर्नाशां शान्तिं तुर्यपदाभिधाम् ।। ९

तुर्यविश्रान्तियुक्तस्य प्रतीपस्य भवार्णवात् ।

जीवतोऽजीवतश्चैव गृहस्थस्य तथा यतेः ।। १०

न कृतेनाकृतेनार्थो न श्रुतिस्मृतिविभ्रमैः ।

निर्मन्दर इवाम्भोधिः स तिष्ठति यथास्थितम् ।। ११

एकांशेनोपमानानामुपमेयसधर्मता ।

बोद्धव्यं बोध्यबोधाय न स्थेयं बोधचञ्चुना ।। १२

यया कयाचिद्युक्त्या तु बोद्धव्यं बोध्यमेव ते ।

युक्तायुक्तं न पश्यन्ति व्याकुला बोधचञ्चवः ।। १३

हृदये संविदाकाशे विश्रान्तेऽनुभवात्मनि ।

वस्तुन्यनर्थं यः प्राह बोधचञ्चुः स उच्यते ।। १४

अभिमानविकल्पांशैरज्ञो ज्ञप्तिं विकल्पयेत् ।

बोधं मलिनयत्यन्तः स्वं खमब्द इवामलम् ।। १५

सर्वप्रमाणसत्तानां पदमब्धिरपामिव ।

प्रमाणमेकमेवेह प्रत्यक्षं तदतः शृणु ।। १६

सर्वाक्षसारमध्यक्षं वेदनं विदुरुत्तमाः ।

नूनं तत्प्रतिपत्सिद्धं तत्प्रत्यक्षमुदाहृतम् ।। १७

अनुभूतेर्वेदनस्य प्रतिपत्तेर्यथाभिधम् ।

प्रत्यक्षमिति नामेह कृतं जीवः स एव नः ।। १८

स एव संवित्स पुमानहंताप्रत्ययात्मकः ।

स ययोदेति संवित्त्या सा पदार्थ इति स्मृता ।। १९

ससंकल्पविकल्पाद्यैः कृतनानाक्रमभ्रमैः ।

जगत्तया स्फुरत्यम्बु तरङ्गादितया यथा ।। २०

प्रागकारणमेवाशु सर्गादौ सर्गलीलया ।

स्फुरित्वा कारणं भूतं प्रत्यक्षं स्वयमात्मनि ।। २१

कारणं त्वविचारोत्थजीवस्यासदपि स्थितम् ।

सदिवास्यां जगद्रूपं प्रकृतौ व्यक्तिमागतम् ।। २२

स्वयमेव विचारस्तु स्वत उत्थं स्वकं वपुः ।

नाशयित्वा करोत्याशु प्रत्यक्षं परमं महत् ।। २३

विचारवान्विचारोऽपि आत्मानमवगच्छति ।

यदा तदा निरुल्लेखं परमेवावशिष्यते ।। २४

मनस्यनीहिते शान्ते स्वबुद्धीन्द्रियकर्मभिः ।

नहि कश्चित्कृतैरर्थो नाकृतैरप्यभावनात् ।। २५

मनस्यनीहिते शान्ते न प्रवर्तन्त एव ते ।

कर्मेन्द्रियाणि कर्मादावसंचारितयन्त्रवत् ।। २६

मनोयन्त्रस्य चलने कारणं वेदनं विदुः ।

प्रणालीदारुमेषस्य रज्जुरन्तर्गता यथा ।। २७

रूपालोकमनस्कारपदार्थव्याकुलं जगत् ।

विद्यते वेदनस्यान्तर्वातान्तः स्पन्दनं यथा ।। २८

सर्वात्मवेदनं शुद्धं यथोदेति तदात्मकम् ।

भाति प्रसृतदिक्कालबाह्यान्तारूपदेहकम् ।। २९

दृष्ट्वैव दृश्यताभासं स्वरूपं धारयन्स्थितः ।

स्वं यथा यत्र यद्रूपं प्रतिभाति तथैव तत् ।। ३०

स सर्वात्मा यथा यत्र समुल्लासमुपागतः ।

तिष्ठत्याशु तथा तत्र तद्रूप इव राजते ।। ३१

सर्वात्मकतया द्रष्टुर्दृश्यत्वमिव युज्यते ।

दृश्यत्वं द्रष्टृसद्भावे दृश्यतापि न वास्तवी ।। ३२

अकारणकमेवातो ब्रह्म सिद्धमिदं स्थितम् ।

प्रत्यक्षमेव निर्मातृ तस्यांशास्त्वनुमादयः ।। ३३

स्वयत्नमात्रे यदुपासको य-

स्तद्दैवशब्दार्थमपास्य दूरे ।

शूरेण साधो पदमुत्तमं तत्

स्वपौरुषेणैव हि लभ्यतेऽन्तः ।। ३४

विचारयाचार्यपरम्पराणां

मतेन सत्येन सितेन तावत् ।

यावद्विशुद्धं स्वयमेव बुद्ध्या

ह्यनन्तरूपं परमभ्युपैषि ।। ३५

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मुमुक्षुव्यवहारप्रकरणे प्रमाणनिरूपणं नामैकोनविशः सर्गः ।। १९ ।।